असत्यमिति। सत्यशब्दवाच्यं , ' सत्यं ज्ञानमनन्तं ब्रह्म ' – तैत्तिरीयोपनिषत् -- इत्यादि वेदवाक्यप्रतिपाद्यं जगतः कारणं ब्रह्म इति नास्ति किञ्चिद्वस्तु। ' नास्तिको वेदनिन्दकः' इति मनुः। यदा वेदस्य प्रामाण्यं नास्ति तदा तत्प्रतिपाद्यस्य जगत्प्रतिष्ठाहेतुरिति जेगीयमानस्य धर्मस्यापि नास्ति प्रामाण्यम् - ' धर्मो विश्वस्य जगतः प्रतिष्ठा ' - महानारायणोपनिषत् । प्रतितिष्ठति अनया इति धर्म उच्यते। धारणाद्धर्म इत्याहुःइति तद्विदः। अथ अनुमानगम्यः ईश्वरः नियन्ता जगतः इत्यपि अनृतमेव। स्वाभाविकत्वात्सुखदुःखानां न प्रमाणान्तरापेक्षा। अथ यदि तत्र नैव कश्चन अधिकारी कथम् एतज्जगत्संभवति इति आकाङ्क्षायाम् आह – अपस्परसंभूतम् अपरस्परेण स्त्रीपुरुषनिरन्तरसंयोगक्रियया संभवनं यस्य तज्जगत् - 'अपरस्पराः क्रियासातत्ये ' इति पाणिन्यनुशासनेन (6-1-139) अपरे च परे च इति विग्रहे सुडागमःक्रियासातत्यद्योतकः समासाश्रयः निपातितः। जगतः अविच्छेदेन संभवः अनेन सूचितस्सन्प्रलयादिकं निराकरोति।

अपरस्परत्वं कस्य हेतोःइत्यतआह – कामहैतुकम् इति। काम एव हेतुः अपरस्परस्य। अपरस्परशब्दःकामहैतुकम् इत्यनेन साकाङ्क्षः- गमकत्वात्समासः। अर्थात्कामेन तावत्स्त्रीपुरुषयोः संयोगःअविच्छेदेन गच्छति इति जगदपि अविच्छेदेन वर्तते इत्यर्थः। किमन्यत् ? कामहेतुकाविच्छिन्नस्त्रीपुरुषसंयोगक्रियां विना नान्यत्किञ्चित्कारणं जगतः संभवस्य अस्ति इत्यर्थः।

English Translation --

Intro : (Now Vedavyasa explains the behavior of demons by twelve verses ) Here is the second verse, which gives the doctrine of Carvakas tersely . Carvakas (ethiests) believe Pratyaksam (Perception) as the only Means of Knowledge . Neither Veda nor Dharma

nor anything proposed by Veda , such as ईश्वर, is acceptable to them . Everything in the universe happens naturally -

There is no anything called Brahman that is described as the cause of the world and denoted by the term Satyam in Upanisats . Dharma , which is said to be the base of the universe , is also meaningless. Rather, the universe does exist simply due to the continuous union of males and females caused by lust.

प्रामाण्यं हेतुत्वमित्यर्थः। वेदप्रामाण्याभावाद्धर्मस्य न हेतुत्वं जगद्विषये । अथवा धर्मेण वेदस्य ,जगद्विषये च न धर्मस्य प्रामाण्यम् इति परम्परा। महावाक्यार्थःस्वीकरणीयः , अवान्तरवाक्यार्थस्य साकाङ्क्षत्वात्। महावाक्यस्यावधिश्च विवक्षामनुसृत्यैव।

' सति महावाक्ये नावान्तवाक्यं प्रमाणम् ' इति शाबरभाष्यम् अर्थवादाधिकरणे (6-4-7-25) ।

वस्तुतः प्रमाणम् इतिशब्दस्य हेतुरप्यर्थः --

वैशेषिकदर्शनम् **-**

अस्येदं कार्यं कारणं संयोगि वियोगि समवायि चेति लैङ्गिकम् 9-2-1

हेतुरपदेशो लिङ्गं प्रमाणं करणमित्यनर्थान्तरम् 9-2-4

(लिङ्ग्यते ज्ञायते अनेन इति लिङ्गं हेतुः – लैङ्गिकम् अनुमानम्)

पाणिनीयम्

तदशिष्यं संज्ञाप्रमाणत्वात् पा सू 1-2-53 (प्रमाणम् = प्रत्यायकः / वाचकः)

योगप्रमाणे च तदभावे अदर्शनं स्यात् पा सू 1-2-55(प्रमाणम्=प्रत्यायकः)

प्रधानप्रत्ययार्थवचनम् अर्थस्य अन्यप्रमाणत्वात् पा सू 1-2-56 (प्रमाणम्=हेतुः/करणम्)

अमरकोशः

प्रमाणं हेतुमर्यादा शास्त्रेयत्ताप्रमातृषु

मेदिनीकोशः **---**

प्रमाणं नित्यमर्यादाशास्त्रेषु सत्यवादिनि।

इयत्तायां च हेतौ च क्लीबैकत्वे प्रमातरि॥

एकत्वे’पीति रभसः।

प्रमीयते अनेन इति प्रमिमीते इति वा प्रमाणम्।

प्रमाणम् = हिंसकः (मीङ् हिंसायाम्) – वाक्यपदीये पदकाण्डे जातिसमुद्देशे श्लो 4,5

Can so many great scholars go wrong for 1200+ years in the interpretation / translation of a term that is pregnant with meaning -

अत्र विद्वांसः प्रमाणम् --

This is simply to suggest that one should be careful while going thru commentaries – प्रमादो धीमतामपि - not to accept everything at face value .

While helping **Bhagavadgita Foundation** I came across the following verse of Bhagavadgita (16-8)--

असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्।

अपरस्परसंभूतं किमन्यत्कामहैतुकम्॥

I got reminded the पाणिनिसूत्रम् - अपरस्पराःक्रियासातत्ये (6-1-139) which I learnt in 1973.

कोराडीयं व्याख्यानम् **--**

अवतारिका -

(अथ द्वादशभिःश्लोकैःआसुरीं प्रवृत्तिं विवृणोति) नास्तिकानां मते ’प्रत्यक्षमेकं चार्वाकाः’ इत्युक्तरीत्या सत्यधर्मेश्वरादि नास्त्येव।सर्वं तावत्स्वाभाविकमेव जगत् इत्याह द्वितीयेन--

असत्यमिति। सत्यशब्दवाच्यं , ’ सत्यंज्ञानमनन्तंब्रह्म ’ इत्यादिवेदवाक्यप्रतिपाद्यं जगतःकारणं ब्रह्म इति नास्ति किञ्चिद्वस्तु। ’ नास्तिकोवेदनिन्दकः’ इति मनुः। यदा वेदस्य प्रामाण्यं नास्ति तदा तत्प्रतिपाद्यस्य जगत्प्रतिष्ठाहेतुरिति जेगीयमानस्य धर्मस्यापि नास्ति प्रामाण्यम्। प्रतिष्ठति अनया इति धर्म उच्यते। धारणाद्धर्ममित्याहुः इति तद्विदः। अथ अनुमानगम्यः ईश्वरः नियन्ता जगतःइत्यपि अनृतमेव। स्वाभाविकत्वात्सुखदुःखानां न प्रमाणान्तरापेक्षा। अथ यदि तत्रनैव कश्चन अधिकारी कथम् एतज्जगत्संभवति इति आकाङ्क्षायाम् आह – अपस्परसंभूतं निरन्तरसंभववत् -

'अपरस्पराःक्रियासातत्ये ' इतिपाणिन्यनुशासनेन अपरे च परे च इति विग्रहे सुडागमः क्रियासातत्यद्योतकः समासाश्रयः निपातितः। जगतः अविच्छेदेन संभवः अनेन सूचितस्सन्प्रलयादिकं निराकरोति। तच्च कस्य हेतोःइत्यतआह – कामहैतुकम् इति। काम एव हेतुः अपरस्परसंभवस्य। अर्थात्कामेन तावत्स्त्रीपुरुषयोः संयोगः अविच्छेदेन गच्छति इति जगदपि अविच्छेदेन वर्तते इत्यर्थः। किमन्यत् ? कामहेतुकाविच्छेदसंभवं विना नान्यत्किञ्चित्जगतःकारणम् अस्ति इत्यर्थः।

Let me explain the पाणिनिसूत्रम्--

अपरस्पराःक्रियासातत्ये (6-1-144) –सुट्  निपात्यते। अपरस्पराःसार्था गच्छन्ति।सततम् अविच्छेदेन गच्छन्तीत्यर्थः। क्रिया- इतिकिम्? अपरपरा गच्छन्ति। अपरे च परे च सकृदेव गच्छन्तीत्यर्थः(कौमुदी)

अपरस्पराः - to explain this term Panini used a word that cannot be analyzed by Panini , but by a पूर्वाचार्यसूत्रम् - लुम्पेत्(अन्त्यम्)- this aspect is discussed  in another post viz पाणिनेःअपाणिनीयप्रयोगः , here on BVP.

Here the meaning of सुट् , i e क्रियानैरन्तर्यम् , is very important - suppose there is bumper to bumper traffic on a highway (or any city road) all the time we say-

अपरस्पराणि वाहनानि गच्छन्ति।

' न कदाचित् अस्मिन्महापथे गमनं विच्छिद्यते इत्यर्थः ' - पदमञ्जरी।

Hereunder I produce some commentaries in **Sanskrit, Hindi and English** .

Only one commentator (नीलकण्ठदीक्षितः - भावदीपे) quoted this सूत्रम् , but misinterpreted . It is not mandatory to quote Panini everywhere but when we come across a term like this , which is pregnant with meaning, then better explain the inner meaning with proof .

In ब्रह्मसूत्रभाष्यम् , शंकराचार्य quoted only for मयट् and क्तिच्।

**Vedavyasa preferred this word to denote some special meaning , but none of the commentators had  noticed this. The translators are hopeless.**

There are शंकर-रामानुज-मध्व-वल्लभाचार्याः ,आनन्दगिरि-वेदान्तदेशिक-जयतीर्थ-वेङ्कटनाथ-नीलकण्ठदीक्षित-मधुसूदनसरस्वत्यादयः।

परमार्थप्रपा **-** translated into Telugu by Vidvan Bulusu AppannasastrI , a great नैयायिक says -

अपरशब्दःसकारान्तः।अपरश्चपरश्च अपरस्परम् इति विग्रहः। स्त्रीपुरुषमिथुनम् इत्यर्थः।

Other translations in Telugu (including the popular गीतामकरन्दमु of 1963 , which follows शांकरभाष्यम्) also committed the same mistake. If one takes all the commentaries and translations (other vernaculars of India) I think it will be one hundred.

असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्। अपरस्परसंभूतं किमन्यत्कामहैतुकम्॥१६.८॥

. . . ।अपरस्परसंभूतमकिञ्जित्कामहेतुकम्॥८॥इति काश्मीरपाठः।

शङ्कराचार्यः– किञ्चापरस्परसम्भूतं कामप्रयुक्तयोःस्त्रीपुरुषयोरन्योन्यसंयोगाज्जगत्सर्वं सम्भूतम्।

Svāmī Gambhīrānanda's translation (of Śaṅkarācāryabhashyam)* - Moreover, it is aparaspara-sambhutam, born of mutual union. The whole world is born of the union of the male and female impelled by passion.

आनन्दगिरिः–
शास्त्रैकगम्यमदृष्टंनिमित्तीकृत्यप्रकृत्यधिष्ठान्नात्मकेनब्रह्मणारहितंजगदिष्यतेचेत्कथंतदुत्पत्तिः? इत्याशङ्क्याह– किञ्चेति।

रामानुजाचार्यः* – वदन्ति च एवम्; अपरस्परसम्भूतं किम् अन्यत्? योषित्पुरुषयोःपरस्परसम्बन्धेन जातम् इदं मनुष्यपशवादिकम् उपलभ्यते। अनेवंभूतं किम् अन्यद् उपलभ्यते? किञ्चिद् अपि न उपलभ्यते इत्यर्थः। अतःसर्वम् इदं जगत्कामहेतुकम् इति ।

वेदान्तदेशिकस्य तात्पर्यचन्द्रिका* – 'अपरस्पर' – इत्यादिकं न पूर्वेणैकवाक्यम्,'किमन्यत्' इत्यादेरनन्वयात्क्लिष्टकल्पनादनुपपत्तेश्च।एतदेवैषामासुरत्वे पर्याप्तं, किमन्यदुच्यते? इतिकल्पना अध्याहारादिग्रस्ता। 'वदन्ति चैवमिति' तु नाध्याहारादिविवक्षयोक्तम् ,' एतां दृष्टिम्॥

मध्वाचार्यः– परस्परसम्भवो ह्युक्तः'अन्नाद्भवन्तिभूतानि' 3।14 इत्यादिना॥

जयतीर्थस्यप्रमेयदीपिका– अपरस्परसम्भूतम् इत्यस्यापरं परस्मात्सम्भूतमितिव्याख्यानमसत्, प्रतिषेधप्रकरणात्।अतःपरस्परसम्भूतं न भवतीत्याहुरित्येव व्याख्येयम्।स्यादेवम्, यदि परस्परसम्भवो भगवतोऽभिमतःस्यात् इत्यतआह– परस्परेति।यद्वानेन परव्याख्यानासाधुत्वमुपपादयति।भगवता परस्परसम्भवस्योक्तत्वात्तद्वचनं कथमासुरम् ? इति।

हनुमतःपैशाचभाष्यम्– तत्राह अपरस्परेति।अपश्चपरश्चापरस्परम्, परस्परमित्यर्थः। ततःसम्भूतं कामप्रयुक्तयोः स्त्रीपुरुषयोरन्योन्यसङ्गादुत्पन्नं जगत्, अतःकामहैतुकं कामहेतुकमेव कामहैतुकम्। नन्वदृष्टेश्चरादिकमपि किं कारणम् ? नेत्याह– किमन्यदिति।कामादन्यत्कारणं किमस्ति ? नास्त्येवेत्यर्थः। यद्वा मनुष्यपश्चादिकं सर्वमपि स्त्रीपुंसयोःपरस्परसम्बन्धेनैव जातमुपलभ्यते, अपरस्परसम्भूतं तु किमन्यदुपलभ्यते ? नकिञ्चिदपि, अतःकामहैतुकमेव जगदित्याहुरिति योजना॥८॥

वेङ्कटनाथस्य ब्रह्मानन्दगिरिः– तत्राह अपरस्परेति। अपरश्चपरश्चापरस्परम्, परस्परमित्यर्थः।ततःसम्भूतं कामप्रयुक्तयोः स्त्रीपुरुषयोरन्योन्यसङ्गादुत्पन्नं जगत्, अतःकामहैतुकं कामहेतुकमेव कामहैतुकम्।

वल्लभाचार्यस्य तत्त्वदीपिका– अपरस्परसम्भूतम् अपरस्परसम्भूतयोरन्योन्यसङ्गतयोः प्रकृतिरूपयोषित्पुरुषयोः परस्परसम्बन्धेन जातमिदं मनुष्यपश्वाद्युपलभ्यतेऽनवम्भूतं किमन्यत्?

पुरुषोत्तमस्य अमृततरङ्गिणी– इत्याह अपरस्परेति। अपरश्च परश्चेत्यपरस्परं स्त्रीपुरुषसंयोगस्ततो जातं कामहैतुकं स्त्रीपुरुषयोःकाम एव हेतुर्यस्य तादृशम्।

ऩीलकण्ठदीक्षितस्य भावदीपः– अपरस्परसम्भूतं "अपरस्पराःक्रियासातत्ये॥अष्टा॰६.११.४४" इति सुट्।

बीजांकुरवत्परस्परकारणीभूतानां धर्माधर्मतद्वासनानां यत्सातत्यं तस्मात्सम्भूतं, किमन्यल्लोकेऽस्ति?

मधुसूदनसरस्वती– अपरस्परसम्भूतं कामप्रयुक्तयोः स्त्रीपुंसयोरन्योन्यसंयोगात्सम्भूतं जगत्कामहैतुकं कामहेतुकमेव कामहैतुकं कामातिरिक्तकारणशून्यम्।

धनपतेःभाष्योत्कर्षदीपिका– अपरस्परसम्भूतं परापरशब्दावन्यशब्दपर्यायौ। कामप्रयुक्तयोःस्त्रीपुरुषयोरन्योन्यसङ्गाज्जातं काम एव हेतुर्यस्य तत्कामहेतुकं . . .

श्रीधरस्वामी– अपरश्चपरश्चेत्यपरस्पर अपरस्परतोऽन्योन्यतःस्त्रीपुरुषमिथुनात्सम्भूतं जगत्किमन्यत्कारणमस्य . .

अभिनवगुप्तः– न व्याख्यातम्

विश्बनाथः– स्वेदजादीनामकस्मादेव जातत्वादपरस्परसम्भूतम्। अन्यत्किं वक्तव्यम्। कामहैतुकं कामो वादिनामिच्छैव हेतुर्यस्य तत् ।. . .ननु स्त्रीपुंसयोः परस्परप्रयत्नविशेषाज्जगदेतदुत्पन्नं दृश्यत इत्यपि भ्रम एव कुलालस्य घटोत्पादने ज्ञानमिव मातापित्रोस्तादृशबालोत्पादने किल नास्ति ज्ञानमिति भावः।

बलदेवः– अथ स्वभाववादिनां बौद्धानामाह अपरस्परसम्भूतमिति स्त्रीपुरुषसम्भोगजन्यं जगन्नभवति घटोत्पादने कुलालस्येव बालोत्पादने पित्रादेर्ज्ञानाभावात्सत्यप्यसकृत्सम्भोगे सन्तानानुत्पत्तेश्च स्वेदजादीनामकस्मादुत्पत्तेश्च। तस्मात्स्वभावादेवेदं भवतीति।अथ लोकायतिकानामाह कामहेतुकमिति।

श्रीधर्मदत्तशर्मा (गूढार्थतत्त्वालोकः) – न व्यख्यातम्

आनन्द(वर्धन)स्य ज्ञानकर्मसमुच्चयम् (काश्मीरपाठमधिकृत्य कृतम्) – अपरस्परसंभूतं, प्रकृतेर्महां स्ततोऽहङ्कार इति बीजाङ्कुरन्यायप्राप्तकार्यकारणभावरहितम्।अकिञ्चित्कं न विद्यते किञ्चित्स्वर्गनरकादि यस्य परलोकहीनम्।

**Kashinath Tryambak Telang**: They say the universe is devoid of truth, devoid of fixed principle, and devoid of a ruler, produced by union (of male and female) caused by lust, and nothing else.

Dr. Prasad: They say: the world is unreal, without a substratum, without a God, and without an order. Sexual union of man and woman alone and nothing else causes the world.

Śrīlaprabhupāda – They say that this world is unreal, with no foundation, no God in control. They say it is produced of sex desire and has no cause other than lust.

Prof. S. Radhakrishnan – They say that the world is unreal, without a basis, without a Lord, not brought about in regular causal sequence, caused by desire, in short.

Svāmī Gambhīrānanda – They say that the world is unreal, it has no basis, it is without God. It is born of mutual union brought about by passion! What (cause can there be)?

Swami Chinmayananda's Hindi Commentary* - इनके मतानुसार यह सम्पूर्णचराचरजगत्केवल महाभूतों के परम्परसंबंध से उत्पन्न हुआ है और यह संबंध जिस किसी रूप में परिणित होता है, वह केवल 'संयोग' की बात है, और न कि उस के पार्श्व में कोई नियम है। प्राणियों की उत्पत्ति का एक मात्र कारण है, कामवासना।

Swami Ramsukhdas's Hindi Commentary* - अपरस्परसम्भूतं किमन्यत्कामहैतुकम् – वे कहते हैं कि स्त्री को पुरुष की और पुरुष को स्त्री की कामना हो गयी।अतः उन दोनों के परस्परसंयोग से यह संसार पैदा हो गया। इसलिये काम ही इस संसार का हेतु है।

* From Gita Super Site 2.0. Others are from books like Bhagavadgītā with 11 commentaries; with 8 commentaries and with 4 commentaries and S. K. Belvalkar's edition of Kashmiri Text with Ananda(vardhana)'s commentary.

**100 misinterpretations / mistranslations -**

As you see this commentator did not go to the example of the Sutram nor apply the same in the present context (लक्ष्यलक्षणसमन्वयः) -

उन की दृष्टि में बेटे से बाप और बाप से बेटा पैदा होता है.

(Here, there is कार्यकारणभावनिश्चयः)

If the क्रिया is नित्या, i e सततम् अविच्छेदेन गच्छति, then only one should use this term , अपरस्पर।

जहाँ क्रिया में कार्य-कारणभाव का निश्चय न किया जा सके, उस का नाम होता है अपरस्पर-संभूत.

I do not know as to what is कार्यकारणभावस्य अनिश्चयः - this has no context nor there is any प्रमाणम् in any commentary --

In the present context it is clearly stated कामहैतुकम् - it means स्त्रीपुरुषसंयोग is कारणम् of this कार्यम् called जगत्।

Then where is the beginning and end (सृष्टि and प्रळय)?

Carvakas do not accept प्रळय (and its सापेक्ष - सृष्टि also is not there- अर्थात्सिद्धम्) -

it means it is नित्यम् (त्रिकालाबाध्यम्) - so neither beginning nor end -

to explain the above concept of Carvakas ,Vedavyasa employed the strong and very rare term ' अपरस्पर (-संभूतम्)।

Mimamsakas also do not accept प्रळय and Vedantins accept षडनादयः।

Let us follow - वीतरागभयक्रोधः - call a spade a spade. It is no sin and I believe this is – अनुद्वेगकरं वचः- सात्त्विकम्

Generally speaking -

गतानुगतिको लोको न लोकः पारमार्थिकः।

गङ्गासैकतलिङ्गेन नष्टं ताम्रभाजनम् ॥

There are many instances across Sastras, Darsanas, Kavyas etc where things went awry. I shall discuss other such issues also. The purpose is simply - to bring out the right / authoritative meaning and train students to study on these lines .

सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः - we have to be familiar with Upanisats in order to understand the inner meaning of the terse text - भगवद्गीता

Except in difficult cases , we do not go deep into व्याकरणम्। Other Darsanas have to be taken for clarity .

One may respect his गुरु /आचार्य / संप्रदायप्रवर्तक etc, but if there is any miss out then it is our responsibility to discuss the matter - it is not द्रोह।

When different Acaryas say differently you (=x) take the path that is proper -

कपिलो यदि सर्वज्ञः काणादो नेति का प्रमा**?**

तावुभौ यदि सर्वज्ञौ मतभेदः कुतस्तयोः **?**

Let me elaborate the present position --

परस्परम् -- what is this ? --

'कर्मव्यतिहारे सर्वनाम्नो द्वे वाच्ये **,**समासवच्च बहुलम् **'** **(**वार्तिकम् **-** द्विरुक्तप्रकरणम्)

बहुलग्रहणात् अन्यपरयोः न समासवत् (इतरशब्दस्य नित्यम्) - परपर

'असमासवद्भावे पूर्वपदस्थस्य सुपःसुर्वक्तव्यः**'** **(**वा)अन्यो'न्यं विप्रा नमन्ति।

परस्पर - अत्र 'कस्कादिषुच ' (आकृतिगणः) इति विसर्गस्य सः – परस्परं विप्रा नमन्ति।

'स्त्रीनपुंसकयोः उत्तरपदस्थाया विभक्तेःआंभावो वा वक्तव्यः **(**वा**)** - परस्पराम् / परस्परम्।

न (नञ्) + परस्परे = अपरस्परे- 'सुपोधातुप्रातिपदिकयोः ' इति सुब्लुक्प्राप्तः , बाहुलकबलेन न भवति। So परस्परम् / अपरस्परे (नञ्समासः) - in both these cases there should be कर्मव्यतिहारः।

In the case of अपरस्पराः , there is no कर्मव्यतिहारः – अपरस्पराः सार्थाः गच्छन्ति = सततम् अविच्छेदेन गच्छन्ति - there is no any mutual activity.

The सुडागम in अपरस्पराः is द्योतक of क्रियासातन्य - as such there is gulf of difference between अपरस्परे (नञ्समास) and अपरस्पराः (सुडागमः) । Now let us see how **different commentators took** it -

Some of them did not attempt (the result will be discussed). Others took it as नञ्समास - but then it should be अपरस्परे - अपरस्परैः etc

By the by in the second case there will be problem - the word कामहैतुकम्  suggests कर्मव्यतिहार  and this is a विशेषणम् of अपरस्परसंभूतम्  which means born without कर्मव्यतिहार |

There is no कार्यकारणभाव or अन्यो'न्यम् / परस्परम् denoted by अपरस्परसंभूतम्।

Significance and importance of the term अपरस्परसंभूतम् - which means नैरन्तर्येण संभूतम्.

Carvakas do not accept प्रळय , as such the सापेक्षिक - सृष्टि is also not there - so  if you do not take नैरन्तर्यम् then this concept will be affected.

Mimamskas also do not accept प्रळय (and सृष्टि as well) – न कदापि अनीदृशं जगत् ।

Vedantins (अद्वैते)accept six अनादिs -

जीव ईशो विशुद्धा चित्तथा जीवेशयो र्भिदा।

अविद्या तच्चितोर्योगः षडस्माकमनादयः॥

In such cases  परिहार is there in सांख्यसूत्रानिरुद्धवृत्ति **--**

यत्रोभयोः समो दोषःपरिहारो'पि वा समः।

नैकः पर्यनुयोक्तव्यः तदर्थस्य विचारणे॥

Now अप्रतिष्ठम् –

प्रतिष्ठा , प्रतिष्ठितम् , प्रतिष्ठाम् , प्रतितिष्ठति etc are used so many times across तैत्तिरीयारण्यकम्

and तैत्तिरीयोपनिषत् and other Vedas/Upanisats. In the same अनुवाक as सत्यं ज्ञानमनन्तं ब्रह्म (आनन्दवल्ली- तै उप) there is ब्रह्मपुच्छं प्रतिष्ठा -

But don't you think it is assigning पुनरुक्तिदोष to Vedavyasa( सत्यम् = ब्रह्म already said) -yes , so I have taken ' धर्मो विश्वस्य जगतः प्रतिष्ठा ' (महानारायणोपनिषत्)  --

प्रतितिष्ठति अनया जगत् इति प्रतिष्ठा – धर्म उच्यते।

Carvakas refute both पूर्वमीमांसा and उत्तरमीमांसा (धर्म and ब्रह्म)

Now अपरस्परसंभूतम् -

Panini  instituted प्रत्ययs in वर्तमान , भूत , भविष्यत् , कालसामान्य etc.

"नित्यप्रवृत्ते च कालाविभागात्" - वार्तिकम्( महाभाष्यम्- वर्तमाने लट्-3-2-123)

Here it is नपुंसके भावे क्तः पा सू 3-3-114 in कालसामान्य - then अर्श आदित्वात् मत्वर्थीयःअच् -

’भाव एव हि धात्वर्थः इत्यविच्छिन्न आगमः ’ -वाक्यपदीयम् (पदकाण्डः - क्रियासमुद्देशः -श्लोकः 23 )

So, I said संभवः(संभूतम्) - ,अपरस्परसंभूतम् and जगत् are in सामानाधिकरण्यम्।

So, there is no need to go to छान्दसत्वम् / पृषोदरादित्वम्।

When the usage is there and the meaning is also clear and when any other type of commentary shall not be faithful to the concept and doctrine of Carvakas as shown -why to go to आर्ष ?

If there is any difference in the form, and not meaning, of a Sabda , then only, we call it आर्ष। Unless and until you quote a single or more commentaries and apply आर्ष , what is the purpose of such discussion ?

Please note -

Patanjali illustrated - अर्शआद्यच् – दुग्धा गावः , विभक्ता भ्रातरः (महाभाष्यम् , ’कर्तरि कृत्’ 3-4-67) |

वनाय पीतप्रतिबद्धवत्सां यशोधनो धेनुमृषेर्मुमोच (रघुवंशः-2)- पीतम् अस्याःअस्तीति पीता।

You may take बहुव्रीहि also – अपरस्परं संभूतं यस्य तत् अपरस्परसंभूतं जगत्।

I have already said - there is सामानाधिकरण्यम्।

आकृतिगण can never be considered on a par with आर्ष / पृषोदरादि।

**The situation is that one cannot take any single commentary (or two) and claim it is correct. By selecting one, please note, you are belittling others - same coin .**

That's why I said - 100 commentaries - I am not in limbo. But even now if there is any commentary that conforms to Panini let us welcome it.

How can anyone neglect the rare term selected by Vedavyasa and interpret in a different way?

Any deviation from the original meaning would certainly affect the doctrine of Carvakas – नास्ति प्रलयः।

अपरस्पराःसार्थाःगच्छन्ति / अपरस्पराणि वाहनानि गच्छन्ति --

where is कार्यकारणभाव ? मृत्तिका iskारणम् - घटःकार्यम्। ईश्वरःकारणम् - जगत्कार्यम्, much less ' indeterminacy ' - what is the context and intended meaning ?

‘The main characteristic of materialists is the conviction about the appearance of "चेतन" from "जड" as an epi-phenomena.’

Let me explain what Carvakas say about चैतन्यम् -

There are four elements - पृथिवी ,अप् , तेजस् and वायु -The देह is formed by the four elements – then just like excitement is born from किण्व ( a kind of gum used in the preparation of wine - India) , चैतन्यम् is born out of the देह. Such a चैतन्यविशिष्टदेह only is called आत्मा।

बृहदारण्यकोपनिषत् says चैतन्यम् will go away along with body at the time of death -

विज्ञानघन एव एतेभ्यःसमुत्थाय न हि प्रेत्य संज्ञास्ति (they quote);प्रेत्य = having died ;संज्ञा = चैतन्यम्

According to Veda it is – सर्वं चेतनावत् - so no problem with जड also. But for Carvakas something is to be created for जड - that may be epi-phenomena.

Are there any guidelines in our tradition which would help to take a decision when a गुरु / आचार्य says something that goes against the real and authentic text ?

Here is याज्ञवल्क्य who offers some उपदेश at the end of his शिक्षा -

युक्तियुक्तं वचो ग्राह्यं न ग्राह्यं गुरुगौरवात्।

सर्वशास्त्ररहस्यं तद्याज्ञवल्क्येन भाषितम्॥

Do not accept anything since it is said by your गुरु , but if it is logically correct then you can take it . This रहस्यम् / सिद्धान्तः is applicable to all Sastras, Darsanas etc.

माण्डूक्यशिक्षा enumerates six reasons for the degeneration of विद्या -

आलस्यात् मूर्खसंयोगात् भयात् रोगनिपीडनात्।

अत्यशक्त्याच्च मानाच्च षड्भिर्विद्या विनश्यति॥

Laziness , company with stupid people , fear, chronic disease , too much of weakness , ego - by these six factors the education would perish.

**Kalidasa** also says -

पुराणमित्येव न साधु सर्वं न चापि काव्यं नवमित्यवद्यम्।

सन्तःपरीक्ष्यान्यतरद्भजन्ते मूढः परप्रत्ययनेयबुद्धिः॥ मालवकाग्निमित्रीयम्

जगदपरस्परसंभूतमनाद्यज्ञानपरंपरासंभूतम् । अपरस्पराः क्रियासातत्ये **(पा 6-1-144) –** जीवगोस्वामी ।

Here in this commentary the Sutram is quoted - but "अनाद्यज्ञानपरम्परा " does not denote क्रियासातत्य - where is क्रिया in the first place ?

अपरस्परसम्भूतं न भवत्येकस्मादेकस्योत्पत्तिरिति क्रमेण नोत्पन्नं येन कर्ता अपेक्षेत - Vanamali

This is just नञ्समास - न + परस्पर।

You can take any number of commentaries - 100 is just a figure that means many, and here , if one takes all the vernaculars of India and foreign languages there will be many more. In most of the cases it is – गतानुगतिको लोको न लोकःपारमर्थिकः।

Where does Bhagavatpada S'ankara stand in this classification? Samkaracarya falls in the fourth basket - who interpreted as अन्योन्य / परस्पर।

Please note that **लोकायतिकs / नास्तिकs were there since creation -**

In ज्योतिश्शास्त्रम् it is discussed -

**If कुज and बुध have got any connection with मेषराशि then he will become a नास्तिक।**

Panini (4-4-60) registered -

**अस्तिनास्तिदिष्टं मतिः (ठक्) = नास्तिकः।**

Manu (2-11) said – **नास्तिको वेदनिन्दकः।**

Bhagavatam (वैरभक्ति **- 6&7**) and Ramayanam discuss this issue .

Bauddhas and Jainas fall under नास्तिक as they oppose वेदप्रामाण्यम् **etc.**

**न हि दोषाणां लक्षणमस्ति - महाभाष्यम् (ङ्याप्प्रातिपदिकात् 4-1-1)**

**आसुरीगुणs** were being discussed by Vedavyasa. No doubt , we received a lot from so many Acaryas .

Everybody has to learn from others --

**ऋषीणामपि यज्ज्ञानं तदप्यागमपूर्वकम् – (30, ब्रह्मकाण्डः- वाक्यपदीयम्)**

So, for some reason or the other the original meaning is lost and generally most of the commentators do not refer to Mahabhasyam / Vakyapadiyam etc.

**REVISED VERSION (it is** प्रतितिष्ठति and धर्मः**) -**

अवतारिका -

(अथ द्वादशभिःश्लोकैःआसुरीं प्रवृत्तिं विवृणोति) नास्तिकानां मते 'प्रत्यक्षमेकं चार्वाकाः' इत्युक्तरीत्या सत्यधर्मेश्वरादि नास्त्येव।सर्वं तावत्स्वाभाविकमेव जगत् इत्याह द्वितीयेन--

असत्यमिति।सत्यशब्दवाच्यं , ' सत्यं ज्ञानमनन्तं ब्रह्म ' इत्यादिवेदवाक्यप्रतिपाद्यं जगतः कारणं ब्रह्म इति नास्ति किञ्चिद्वस्तु। ' नास्तिकोवेदनिन्दकः' इतिमनुः।यदा वेदस्य प्रामाण्यं नास्ति तदा तत्प्रतिपाद्यस्य जगत्प्रतिष्ठाहेतुरितिजेगीयमानस्य धर्मस्यापि नास्ति प्रामाण्यम्। प्रतितिष्ठति अनया इति धर्म उच्यते।धारणाद्धर्म इत्याहुः इति तद्विदः। अथअनुमानगम्यः ईश्वरः नियन्ता जगतः इत्यपि अनृतमेव। स्वाभाविकत्वात्सुखदुःखानाम् न प्रमाणान्तरापेक्षा। अथ यदि तत्र नैव कश्चन अधिकारी कथम् एतज्जगत्संभवति इति आकाङ्क्षायाम् आह – अपस्परसंभूतं निरन्तरसंभववत् - 'अपरस्पराःक्रियासातत्ये ' इति पाणिन्यनुशासनेन अपरे च परे च इति विग्रहे सुडागमः क्रियासातत्यद्योतकः समासाश्रयः निपातितः। जगतःअविच्छेदेन संभवः अनेन सूचितस्सन्प्रलयादिकं निराकरोति। तच्च कस्य हेतोःइत्यत आह – कामहैतुकम् इति। काम एव हेतुः अपरस्परसंभवस्य। अर्थात्कामेन तावत्स्त्रीपुरुषयोः संयोगः अविच्छेदेन गच्छति इति जगदपि अविच्छेदेन वर्तते इत्यर्थः। किमन्यत् ? कामहेतुकाविच्छेदसंभवं विना नान्यत्किञ्चित्जगतः कारणम् अस्ति इत्यर्थः।

English Translation --

Intro : (Now Vedavyasa explains the behaviour of demons by twelve verses ) Here is the second verse, which gives the doctrine of Carvakas tersely . Carvakas (ethiests) believe Pratyaksam (Perception) as the only Means of Knowledge . Neither Veda nor Dharma nor anything proposed by Veda , such as Isvara, is acceptable to them . Everything in the universe  happens naturally -

There is no anything called Brahman that is  described as the cause of the world and denoted by the term Satyam in Upanisats . Dharma , which is said to be the base of the universe , is also meaningless. Rather, the universe does  exist simply due to the continuous union of males and females caused by lust.

*************************************************************************************************

## Linguistics: From Panini to Chomsky

To put it in a few words neither Stall nor Max Muller nor Whitney did learn Panini in the way it should be learned. In the West (presently it started here in India also) people read Panini (mostly translations) and write a book.

Without the knowledge of Padavaakyapramaanasaastras, I fail to understand, as to how one can understand / teach any Sastra. Most of the time the comments they make are provoking and vouch to their impudence.

'aiun.' - without the knowledge of the Nyayasutram – jaatyaakrtivyaktayastu padaarthah, how can one understand as to what Panini meant. The teacher may not initially quote the sutra but later he would explain as to how 'a' etc are to cover 18 akaaras and so on.

Similarly, without the knowledge of 'angaangibhaava'(Purvamimamsa) how can one explain  the structure of Panini's system - the relation between vidhisutra and samjnaa-paribhasaa-adhikaara-atidesa-niyama sutras ?

It is a million dollar question as to how many sastras did they study in gurukula / who were their gurus / what about their memory power / do they have first hand knowledge of works like Mahabhasyam ,Vakyapadiyam , Manjusa( things should be on the tip of the tongue) etc.

Why should one compare Panini etc. with some Western scholar ?

Panini was dealing with 1130 Vedic sakhas, Vedangas, Vaidyakam, Darsanas etc. and the spoken language .

He, just like his predecessors, introduced some samjnas , which are purely technical , i.e. have got nothing to do with the language in common parlance (see Manjusa-first part). This is common to all sastras including Mathematics , Ayurveda , Natyasastra etc.

In Modern Linguistics ' Morphology' is a term borrowed from Plant Sciences .Ekasesa is akin to mathematical calculations .

I have published a book - ' Theories of Language : Oriental & Occidental (2008) and arranged to be sent to America , Canada , Britain and India . I refuted all the Modern

Linguistic Theories vis a vis Indian Theories .So far I have received only one review from Asiatic Society , Bombay (1904), recently .

For some, Panini deals with Morphology, for others Syntax etc. Did they study Panini? Astadhyayi deals with Phonology to Discourse Analysis , i.e. Varna to Mahavakya , including semantics. The comments of Max Muller and Whitney are not worth commenting. It is a waste of time .

I think the following is worthy to note -

विद्वानेव विजनाति विद्वज्जनपरिस्रमम् ।

न हि वन्ध्या विजानाति गुर्वीं प्रसववेदनाम् ॥

प्रज्ञा विवेकं लभते भिन्नैरागमदर्शनैः ।

कियद्वा शक्यमुन्नेतुं स्वतर्कमनुधावता ?

••••••••••••••••••••••••••••••••••••••••••••••••••••••••••••••••••••••